१८

शुकनासोपदेशः - लक्ष्मीदुष्प्रभावः- १

प्रस्तावना

अस्मिन् पाठे शुकनासोपदेशस्य 'एवंविधयापि चानया' इत्यतः आरभ्य 'सर्वजनस्योपहास्यतामुपयान्ति' इत्यन्तः अंशः वर्ण्यते। लोभः पापस्य कारणम्। दुर्लभा इयं श्रीः इति भावयन्तः राजानः प्रतिपदं तस्याः प्राप्तये यतन्ते। जीर्णवेगाः अपि ते भोगविलासम् अतिक्रामितुम् अलम्। तदुपरि दुर्जनैः सह साङ्गत्यं तान् ततोऽधिकं पातयति। सदुपदेशाग्राहिणां राज्ञां स्वार्थैकमनाः कुटिलाः मन्त्रिणः तान् अनैतिके कर्मणि प्रचोदयन्ति। ते परानुकरणपरस्त्रीगमनाद्यसदाचरणमेव सदाचरणमिति मन्यन्ते। तेन ते राजानः प्रजानां सुखदुःखादिकं न पश्यति परन्तु स्वेषामेव भोगसुखादिकं परिलक्षयन्ति। एवम्भूतेन आचरणेन ते विपद्गामिनः विपथगामिनश्च भवन्तीति मन्त्रिणः उपदेशः प्रतिपाद्यते प्रस्तुतेऽस्मिन् पाठे।

उद्देश्यानि

अमुम् पाठं पठित्वा भवान् -

- राजसभायां स्थितानां कुटिलजनानां मनोभावनां ज्ञातुं शक्नुयात्।
- कुटिलाः कथं राजानं वशीकुर्वन्ति इति जानीयात्।
- खलवाक्यानाम् अनुसरणेन राज्ञां हानिं जानीयात्।
- विमूढानां राज्ञां खलानुसारेण गुरोरुपेक्षादिकं निन्दनीयं कर्म जानीयात्।
- पाठस्थानां पदानाम् अन्वयार्थान् समासान् च जानीयात्।

१८.१) साम्प्रतं मूलपाठम् अवगच्छाम – १०

एवंविधयापि चानया दुराचारया कथमपि दैववशेन परिगृहीता विक्लवा भवन्ति राजानः, सर्वाविनयाधिष्ठानताञ्च गच्छन्ति। तथाहि अभिषेकसमय एष चैषां मङ्गलकलशजलैरिव प्रक्षाल्यते दाक्षिण्यम्, अग्निकार्य्यधूमेनेव मलिनीक्रियते हृदयम्, पुरोहितकुशाग्रसम्मार्जनीभिरिव अपनीयते क्षान्तिः, उष्णीषपट्टबन्धेनेवावच्छाद्यते जरागमनस्मरणम्, आतपत्रमण्डलेनेवापसार्य्यते परलोकदर्शनम्, चामरपवनैरिवापह्रियते सत्यवादिता, वेत्रदण्डैरिवोत्सार्य्यन्ते गुणाः, जयशब्दकलकलरवैरिव तिरस्क्रियन्ते साधुवादाः ध्वजपटपल्लवैरिव परामृश्यते यशः।

व्याख्यानम् -

एवंविधया एतादृशया पूर्वमनेकप्रकारैर्वर्णितया अपि दुराचारया दुष्टाचरणया अनया लक्ष्म्या कथमपि केनापि प्रकारेण महता कष्टेन दैववशेन भाग्यवशेन परिगृहीताः स्वीकृताः राजानः भूपाः विक्लवाः विह्वलाः भवन्ति, ते च सर्वाऽविनयाधिष्ठानतां सर्वेषां सकलानाम्, अविनयानां दुर्मतीनाम्, अधिष्ठानताम् आश्रयतां च, गच्छन्ति प्राप्नुवन्ति।

अभिषेकसमये राज्याऽभिषेककाले एव मङ्गलकलशजलैः भद्रकुम्भसलिलैः इव एतेषां राज्ञां दाक्षिण्यं सर्वत्र समवर्तित्वं प्रक्षाल्यते विनाश्यते। अग्निकार्यधूमेन अग्निकार्यं हवनादि तस्य धूमेन वह्निध्वजेन हृदयं राज्ञश्चित्तं मलिनीक्रियते इव कलुषीक्रियते इव। पुरोहितकुशाग्रसम्मार्जनीभिः पुरोहितस्य पुरोधसः कुशाग्राणि दर्भाग्राणि एव सम्मार्जन्यः ताभिः क्षान्तिः राज्ञां क्षमा अपह्रियते इव अपनीयते इव। उष्णीषपट्टबन्धेन इव उष्णीषस्य मुकुटस्य पट्टबन्धः क्षौमवस्त्रबन्धनं तेन जरागमनस्मरणं राज्ञां वार्द्धक्यागतेः, स्मरणं स्मृतिः, आच्छाद्यते आव्रियते इव।

आतपत्रमण्डलेन छत्रमण्डलेन परलोकदर्शनं राज्ञां लोकान्तरज्ञानम् अपसार्यते दूरीक्रियते इव, चामरपवनैः प्रकीर्णकवातैः सत्यवादिता राज्ञां तथ्यभाषकत्वम् अपह्रियते विनाश्यते इव। वेत्रदण्डैः वेतसयष्टिभिः गुणाः शौर्यधैर्यादयः उत्सार्यन्ते दूरीक्रियन्ते इव। साधुवादाः हितवचनानि जयशब्दकलकलरवैः जयशब्दस्य राज्ञां जयपदस्य कलकलरवैः कोलाहलशब्दैः तिरस्क्रयन्ते अभिभूयन्त इव। यशः कीर्तिः ध्वजपटपल्लवैः राज्ञां ध्वजपटाः वैजयन्तीवस्त्राणि पल्लवानि किशलयानि तैः परामृश्यते अपमृज्यते इव।

सरलार्थः -

इयं दुराचारिणी लक्ष्मीः यदि राजभिः कदापि दैवात् स्वीक्रियते तर्हि सर्वाः दुर्मतयः तान् आश्रयन्ति। तथाहि अभिषेकसमये मङ्गलकलशजलैः एषां राज्ञाम् उदारता प्रक्षाल्यते, हवनधूमेन चित्तं मलिनीक्रियते, पुरोहितस्य कुशाग्रभागरूपसम्मार्जन्या दयादाक्षिण्यक्षमासन्तोषादिगुणाः दूरीक्रियन्ते, मुकुटस्य पट्टबन्धनेन राज्ञां वार्धक्यगतेः स्मृतिः आच्छाद्यते, छत्रमण्डलेन तेषां परलोकज्ञानम् अपसार्यते, चामरैः सत्यकथनं निवर्त्यते, वेत्रदण्डैः धैर्यशौर्यादयः दूरं संस्थाप्यन्ते, जयशब्दादिकलरवैः हितवचनानि न श्रूयन्ते। यानि यशांसि नामानि राजस्तुतयः वर्तन्ते यथा राज्ञा इदं कार्यम्, इत्थं स्थेयम् इत्थमाचरणीयमित्यादीनि उत्तमराजचरितवर्णनरूपाः स्तुतयः यथा पत्रैः मलम् अपसार्यते तथैव राज्ञां ध्वजायाः वस्त्ररूपपत्रैः ते स्तुतयः अपसार्यन्ते। एवम्प्रकारेण लक्ष्मीः राजानं पीडयतीति शुकनासस्याशयः।

व्याकरणविमर्शः -

क) समासः

१. उष्णीषपट्टबन्धेन - उष्णीषस्य पट्टबन्धः उष्णीषपट्टबन्धः इति षष्ठीतत्पुरुषसमासः, तेन उष्णीषपट्टबन्धेन इति।

२. चामरपवनैः - चामरस्य पवनैः चामरपवनैः इति षष्ठीतत्पुरुषः।

३. जयशब्दकलकलरवैः - जयशब्दस्य कलकलरवाः जयकलकलरवाः इति षष्ठीतत्पुरुषः, तैः जयशब्दकलकलरवैः इति।

ख) सन्धिविच्छेदः

१. मङ्गलकलशजलैरिव – मङ्गलकलसजलैः इव।

२. सम्मार्जनीभिरिवापह्रियते - सम्मार्जनीभिः इव अपह्रियते।

३. उष्णीषपट्टबन्धेनेवावच्छाद्यते - उष्णीषपट्टबन्धेन इव अवच्छाद्यते।

अलङ्कारविमर्शः

१. एवंविधया इत्यस्मिन् वाक्ये कार्यद्वारा लक्ष्म्यां पिशाचीत्वसमावेशात् समासोक्तिः अलङ्कारः।

२. अभिषेकसमये इत्यतः परामृश्यते इव इत्यस्मिन् वाक्ये प्रक्षालनादिक्रियाणाम् उत्प्रेक्षणात् क्रियोत्प्रेक्षालङ्कारः।

३. पुरोहितकुशाग्रसम्मार्जनीभिः इत्यस्मिन् वाक्ये पुरोहितकुशाग्रादीनां सम्मार्जन्यादिभिः अभेदप्रतिपादनाद् रूपकालङ्कारः। एवमत्र वाक्ये रूपकोत्प्रेक्षयोः सङ्करः।

कोशः

१. "हैमं छत्रं त्वातपत्रम्" इत्यमरवचनात् हैमम्, छत्रम्, आतपत्रम् इत्येते समार्थकाः शब्दाः।

२. "पताका वैजयन्ती स्यात्केतनं ध्वजमस्त्रियाम्" इत्यमरवचनात् पताका, वैजयन्ती, केतनम्, ध्वजम् इत्येते समार्थकाः शब्दाः।

३. "कलशस्तु त्रिषु द्वयोः। घटः कुटनिपावस्त्री" इत्यमरवचनात् कलशः, घटः, कुटः, निपः इत्येते समार्थकाः।

पाठगतप्रश्नाः-१

१. दुराचारया लक्ष्म्या परिगृहीताः राजानः कीदृशाः भवन्ति?

२. अभिषेककाले केन इव राज्ञां दाक्षिण्यं प्रक्षाल्यते?

३. तेषां राज्ञां हृदयं केन मलिनीभवति?

४. राज्ञां क्षमागुणः केन अपसार्यते?

५. अभिषेकसमये राज्ञां वार्धक्यबुद्धिः केन दूरीभवति?

६. राज्ञां यशः अभिषेककाले केन परिमार्ज्यते?

१८.२) साम्प्रतं मूलपाठम् अवगच्छाम - ११

केचिच्छ्रम–वश–शिथिल–शकुनि–गल–पुट–चपलाभिः खद्योतोन्मेष–मुहूर्त–मनोहराभिर्मनस्विजनगर्हिताभिः सम्पद्भिः प्रलोभ्यमानाः, धन–लवलाभावलेपविस्मृतजन्मानोऽनेकदोषोपचितेन दुष्टासृजेव रागावेशेन बाध्यमानाः, विविधविषय–ग्रास–लालसैः पञ्चभिरप्यनेकसहस्रसंख्यैरिवेन्द्रियैरायास्यमानाः, प्रकृतिचञ्चलतया लब्धप्रसरेणैकेनापि सहस्रतामिवोपगतेन मनसा आकुलीक्रियमाणा विह्वलतामुपयान्ति। ग्रहैरिव गृह्यन्ते, भूतैरिवाभिभूयन्ते, मन्त्रैरिवावेश्यन्ते, सत्त्वैरिवावष्टभ्यन्ते, वायुनेव विडम्ब्यन्ते, पिशाचैरिव ग्रस्यन्ते। मदनशरैर्मर्म्माहता इव मुखभङ्गसहस्राणि कुर्वते, धनोष्मणा पच्यमाना इव विचेष्टन्ते, गाढप्रहाराहता इवाङ्गानि न धारयन्ति, कुलीरा इव तिर्य्यक् परिभ्रमन्ति, अधर्म्म–भग्नगतयः पङ्गव इव परेण सञ्चार्य्यन्ते, मृषावाद–विष–विपाक–सञ्जात–मुखरोगा इवातिकृच्छ्रेण जल्पन्ति, सप्तच्छद–तरव इव कुसुमरजोविकारैः पार्श्ववर्तिनां शिरःशूलमुत्पादयन्ति, आसन्नमृत्यव इव बन्धुजनम् अपि नाभिजानन्ति, उत्कुपित–लोचना इव तेजस्विनो नेक्षन्ते, कालदष्टा इव महामन्त्रैरपि न प्रतिबुध्यन्ते, जातुषाभरणानीव सोष्माणं न सहन्ते, दुष्टवारणा इव महामानस्तम्भनिश्चलीकृता न गृह्णन्त्युपदेशम्, तृष्णाविषमूर्च्छिताः कनकमयमिव सर्वं पश्यन्ति, इषव इव पानवर्द्धिततैक्ष्ण्याः परप्रेरिता विनाशयन्ति, दूरस्थितान्यपि फलानीव दण्डविक्षेपैर्महाकुलानि शातयन्ति, अकालकुसुमप्रसवा इव मनोहरकृतयोऽपि लोकविनाशहेतवः, श्मशानाग्नय इवातिरौद्रभूतयः, तैमिरिका इवादूरदर्शिनः, उपसृष्टा इव क्षुद्राधिष्ठितभवनाः, श्रूयमाणा अपि प्रेतपटहा इवोद्वेजयन्ति, चिन्त्यमाना अपि महापातकाध्यवसाया इवोपद्रवमुपजनयन्ति, अनुदिवसमापूर्य्यमाणाः पापेनेवाध्मातमूर्त्तयो भवन्ति, तदवस्थाश्च व्यसनशतशरव्यतामुपगता वल्मीकतृणाग्रावस्थिताः जलबिन्दव इव पतितमप्यात्मानं नावगच्छन्ति।

व्याख्यानम् -

केचिद् इत्यस्य विह्वलतामुपयान्ति इत्यन्तेन भागेन सह सम्बन्धः। केचिद् राजानः श्रम-वश-शिथिल-शकुनि-गल-पुट-चपलाभिः श्रमवशाद् आयासहेतोः शिथिलं श्लथं शकुनेः मयूरादिविहगस्य यत् गलपुटं कण्ठपुटं तद्वत् चपलाभिः चञ्चलाभिः, खद्योतोन्मेष-मुहूर्त-मनोहराभिर्मनस्विजनगर्हिताभिः खद्योतः ज्योतिरिङ्गणः तस्य उन्मेषः प्रकाशः स इव मुहूर्तं मनोहारिणीभिः चित्तहारिणीभिः मनस्विजनगर्हिताभिः ज्ञानिजननिन्दिताभिः सम्पद्भिः धनसम्पत्तिभिः प्रलोभ्यमानाः लोभं प्राप्यमाणाः विह्वलतां विक्लवताम् उपयान्ति उपगच्छन्तीति अन्वयः।

एवमेव केचिद् राजानः धनलवलाभावलेपविस्मृतजन्मानः धनलवस्य द्रव्यलेशस्य यो लाभः प्राप्तिः तेन यः अवलेपः अहङ्कारः, तेन विस्मृत विस्मरणं प्राप्तं जन्म जनुः येषां ते अत्यल्पधनावाप्त्यहङ्कारविस्मृतजनवः अनेकदोषोपचितेन अनेकदोषैः वातकफविकारैः उपचितेन वृद्धिं

प्राप्तेन दुष्टासृजा दुष्टेन रक्तेन यथा बाध्यमानाः पीड्यमानाः जनाः इव तथा रागावेशेन कामक्रोधादिना बाध्यमानाः पीड्यमाना विह्वलताम् उपयान्तीति अन्वयः।

विविधविषय-ग्रास-लालसैः विविधा अनेकप्रकारा ये विषयाः शब्दस्पर्शादयः तेषाम् उपभोगे लालसैः लोलुपैः पञ्चभिः पञ्चसंख्यकैः श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यैः इन्द्रियैः अपि अनेकसहस्रसंख्यैः विषयाणां बहुत्वाद् बहुसंख्यकैः इव इन्द्रियैः हृषीकैः आयास्यमानाः परिपीड्यमानाः केचिद् राजानः विह्वलताम् उपयान्ति इत्यन्वयः।

प्रकृतिचञ्चलतया प्रकृत्या स्वभावेन एव चञ्चलता चपलतया लब्धप्रसरेण प्राप्तावकाशेन एकेनापि एकसंख्यकेन अपि सहस्रता इव सहस्रभावम् इव उपगतेन प्राप्तेन मनसा चित्तेन आकुलीक्रियमाणाः व्यग्रीक्रियमाणाः सन्तः केचिद् राजानः विह्वलतां विक्लवताम् उपयान्ति उपगच्छन्ति।

राज्ञाम् अवस्थान्तराणि प्रतिपादयति कविः – ग्रहैरेव इव इति। केचिद् राजानः ग्रहैः शनैश्चरादिभिः गृह्यन्ते इव अनेकविकारावलोकनाद् आकृष्यन्ते इव, भूतैः देवयोनिविशेषैः अभिभूयन्ते इव तिरस्क्रियन्ते इव, मन्त्रैः वैदिकैः तान्त्रिकैर्वा आवेश्यन्ते इव वशीक्रियन्ते इव, सत्त्वैः शार्दूलप्रभृतिभिः हिंस्रप्राणिभिः वेदनावगमाद् अवष्टभ्यन्ते इव हठाद् गृह्यन्ते इव, वायुना वातव्याधिना विडम्ब्यन्ते इव इतस्ततो विक्षिप्यन्ते इव, पिशाचैः राक्षसादिभिः ग्रस्यते इव भक्ष्यन्त इव।

एवमेव राज्ञां स्थित्यन्तराणि वर्णयति - मदनेति। मदनशरैः कामबाणैः मर्म्माहता इव सन्धिस्थानेषु ताडिता इव मुखभङ्गसहस्राणि विवधप्रकारान् मुखभङ्गीन् कुर्वते विदधते, धनोष्मणा अर्थाभिमानसन्तापेन पच्यमानाः पाकविषयीक्रियमाणाः इव विचेष्टन्ते अनेकव्यापारान् कुर्वते, गाढप्रहाराहताः इव गाढप्रहारेण यष्ट्यादिकृतेन तीव्रीघातेन आहता ताडिता दृढाघातताडिताः इव अङ्गानि कायस्य अवयवान् हस्तपादादीन् न धारयन्ति न दृढं स्वयं वहन्ति केचिद् राजानः इत्यन्वयः।

कुलीराः कर्कटाः इव तिर्यक् कुटिलं परिभ्रमन्ति परिभ्रमणं कुर्वन्ति। अर्थाद् व्यवहारे कौटिल्यमाचरन्ति। अधर्म्मभग्नगतयः अधर्म्मेण पापाचारेण भग्ना विनाशं सम्प्राप्ता गतिः गमनं येषां ते तादृशाः सन्तः पङ्गवः पादेन खञ्जाः इव परेण अन्यजनेन सचिवादिना सञ्चार्यन्ते राजशासने प्रवर्त्यन्ते। पङ्गुपक्षे अधर्म्मगतयः इत्यस्य पापेन विनष्टगमनसामर्थ्याः इति, सञ्चार्यन्ते इत्यस्य च मित्रेण करग्रहणादिना गमनं कार्यन्ते इत्यर्थः। मृषावाद-विष-विपाक-सञ्जात-मुखरोगा मृषावादविपाकेन असत्यभाषण-परिणामेन सञ्जातः समुत्पन्नः मुखरोगः वदनव्याधिः येषां ते, तादृशा इव अतिकृच्छ्रेण अतिशयेन कष्टेन जल्पन्ति भाषन्ते। सप्तच्छदतरव इव सप्तपर्णवृक्षाः इव कुसुमरजोविकारैः पुष्परागविकृतिभिः राजपक्षे कुसुमानि नेत्ररोगाः ते एव रजोविकाराः रजोगुणपरिणामाः तैः पार्श्ववर्तिनां सन्निकृष्टानां जनानां शिरःशूलं मस्तकपीडाम् उत्पादयन्ति जनयन्ति। अर्थात् सप्तपर्णद्रुमा यथा पुष्परागविकारैः शिरःपीडां कारयन्ति तथैव केचिद् राजानः दुर्व्यवहारैः समीपस्थानां शिरःपीडां विदधति इति तात्पर्यम्।

आसन्नमृत्यव इव आसन्नः समीपवर्ती मृत्युः मरणं येषां तादृशा समासन्नमरणा इव बन्धुजनम् अपि स्वजनम् अपि न अभिजानन्ति न स्मरन्ति। आसन्नमृत्युजनपक्षे बुद्धिलोपात् स्वजनज्ञानं न भवति राजपक्षे अहङ्कारात् स्वजनज्ञानं न भवति।

उत्कुपितलोचना इव उत्कुपिते रुग्णे लोचने नयने येषां ते रुग्णनयनाः इव राजानः तेजस्विनः प्रतापवतः जनान् न ईक्षन्ते न पश्यन्ति। यथा नेत्ररोगो यस्यास्ति स जनः तेजस्विनः सूर्यादीन् न द्रष्टुं समर्थो भवति, तथा एते राजानः अहङ्कारवशात् ईर्ष्यया वा तेजस्विनः पुरषान् न पश्यन्ति। कालदष्टाः इव कालेन महाविषभुजङ्गमेन दष्टा लोका इव महामन्त्रैः षाड्गुण्यादिभिः अपि न प्रतिबुध्यन्ते बोधं न प्राप्नुवन्ति। यथा कालसर्पेण दष्टा जना गारुडादिमहामन्त्रैः प्रबोधं न यान्ति तथैव महाकालेन दष्टा षाड्गुण्यादिविषयैर्महामन्त्रैरपि बोधं न प्राप्नुवन्तीति तात्पर्यम्।

केचिद् राजानः जातुषाभरणानि लाक्षानिर्मितभूषणानि इव सोष्माणम् अग्निम् इव प्रतापशालिनं न सहन्ते नो मृष्यन्ति। यथा लाक्षानिर्मितानि द्रव्याणि अग्निसन्निधौ न तिष्ठन्ति द्रवीभावं गच्छन्ति तथैव राजानः अपि सोष्माणम् प्रतापवन्तं जनम् ईर्ष्यया न सहन्ते।

दुष्टवारणाः मन्दोन्मत्तगजाः इव महामानस्तम्भनिश्चलीकृताः महत् विशालम् मानं प्रमाणं यस्य सः तादृशो यः स्तम्भः आलानस्तम्भः तेन निश्चलीकृताः स्तब्धतां प्रापिताः सन्तः केचिद् राजानः उपदेशं हितैषिणाम् उपदिष्टं न गृह्णन्ति न स्वीकुर्वन्ति। अत्र महामानस्तम्भनिश्चली इति पदस्य राजपक्षे अर्थस्तावत् - महान् प्रचुरः मानः अहङ्कारः स एव स्तम्भः, तेन निश्चलीकृताः स्थिरीकृताः सन्तः इति। यथा मत्ता हस्तिनः हस्तिपकवचनं शृण्वन्ति तथैव राजानोऽपि हितैषिवचनं न गृह्णति।

तृष्णाविषमूर्च्छिताः तृष्णा अर्थस्पृहा इव विषं गरलं तेन मूर्च्छिताः मूर्च्छां प्राप्ताः इव राजानः सर्वं सकलं पदार्थं कनकमयं सुवर्णमयम् इव पश्यन्ति विलोकयन्ति।

इषवः बाणाः इव पानवर्द्धिततैक्ष्ण्याः पानेन मदिरासेवनेन वर्द्धितं वृद्धिं प्राप्तं तैक्ष्ण्यम् उग्रता येषां ते सुरासेवनवर्द्धितोग्रभावाः परप्रेरिताः परेण अन्येन प्रेरिताः प्रोत्साहताः सन्त विनाशयन्ति प्रजादीन् पीडयन्ति। परप्रेरिता इति पदस्य इषुपक्षे कामुकप्रेरिताः इति राजपक्षे धूर्तप्रोत्साहिताः सन्तः इत्यर्थः, एवमेव विनाशयन्ति इति पदस्य इषुपक्षे लक्ष्याणि नाशयन्ति इति राजपक्षे च प्रजादीन् पीडयन्ति इत्यर्थः।

दण्डविक्षेपैः यष्टिप्रहारैः दूरस्थितानि फलानि दूरे विद्यमानानि फलानि इव राजानः दण्डविक्षेपैः सामादिप्रयोगैः महाकुलानि प्रशस्तान् वंशान् शातयन्ति पीडयन्ति। शातयन्तीत्यस्य फलपक्षे पातयन्तीत्यर्थः।

राजानः अकाले अनवसरे कुसुमप्रसवाः इव पुष्पोद्गमाः इव मनोहरकृतयः सुन्दराकाराः अपि लोकविनाशहेतवः जनक्षयकारणभूताः, श्मशानाग्नयः इव प्रेतवनानलाः इव अतिरौद्रभूतयः अतिरौद्राः अत्यन्तभीषणाः भूतयः सम्पदः येषां ते तादृशाः, तैमिरिका इव तिमिरसंज्ञकेन नेत्ररोगेण आकान्ता इव अदूरदर्शिनः भाविदोषानवलोकिनः, उपसृष्टा इव उत्पादयुक्ता जना इव क्षुद्राधिष्ठितभवनाः क्षुद्रैः नीचजनैः अधिष्ठितम् आश्रितं भवनं निवसस्थानं येषां ते तादृशाः भवन्ति।

श्रूयमाणाः अपि आकर्ण्यमानसंज्ञका अपि प्रेतपटहाः मृतौ वाद्यमानढक्काशब्दा इव उद्वेजयन्ति उद्वेगं जनयन्ति। मृतशरीराणां पुरस्तात् पटहा इति वाद्यविशेषस्य वादनं भवति।

चिन्त्यमानाः अपि संयोगादौ का कथा चेतसि स्मर्यमाणाः अपि महापातकाध्यवसाया महापातकानां ब्रह्महत्यादीनाम् अध्यवसाया उद्योगा इव उपद्रवं चित्तस्य अशान्तिम् उपजनयन्ति उत्पादयन्ति।

राजानः अनुदिवसम् प्रतिदिनम् पापेन कल्मषेण आपूर्य्यमाणाः संभ्रियमाणाः इव आध्मातमूर्त्तयः स्फीतशरीरा भवन्ति।

तदवस्थाश्च ताः पूर्वोक्ताः अवस्थाः दशाः येषां ते तादृशाः, व्यसनशतशरव्यतां व्यसनस्य मृगयाक्षादिबहूलव्यसनस्य शरव्यतां लक्ष्यताम् उपगताः प्राप्ताः, वल्मीकतृणाग्रावस्थिताः वल्मीकं पिपीलिकादिकृतमृत्पुञ्जं तत्र तृणाग्रे तृणाग्रभागे अवस्थिताः विद्यमानाः स्थिताः जलबिन्दवः सलिलबिन्दव इव, पतितम् भ्रष्टम् अपि आत्मानं स्वं न अवगच्छन्ति नो जानन्ति। यथा वल्मीकतृणाग्राभागे अवस्थिता जलबिन्दवः अचेतनत्वात् पतितमात्मानं नावगच्छन्ति तथैव मृगयाक्षाद्यनेकव्यसनासक्ताः राजानः स्वकर्मविच्युतमपि आत्मानं न जानन्तीति भावः।

सरलार्थः -

परिश्रमवशात् पक्षिणः शिथिलीभूतस्य गलदेशस्य इव तथा खद्योतस्य प्रकाशः इव क्षणिकसुन्दरदर्शना इयं सम्पद्। अत एव ज्ञानिभिः निन्दितया एतया सम्पदा प्रलुब्धाः सन्तः केचन राजानः तु ज्ञानिनां निन्दाभाजनाः भवन्ति। एते किञ्चिद्धनलाभस्य अहङ्कारेण स्वस्वजन्मवृतान्तं विस्मरन्ति। वात-पित्त-कफैः दूषितं रुधिरमिव बहुविधैः दोषैः वर्धितां विषयासक्तियन्त्रणां भुञ्जन्ते। शब्दस्पर्शादिविषयाणां ग्रहणे लोलुपैः विषयाणां बाहुल्यात् सहस्रसंख्यकैः इन्द्रियैः कष्टम् अनुभवन्ति। प्रकृत्या मनः विविधेषु विषयेषु प्रधावति। अत एकमपि मनः सहस्रत्वेन प्रतीयते। तेनापि मनसा राजानः चञ्चलताम् उपयन्ति। ते च राजानः पुनः दुष्टग्रहैः आविष्टाः इव, प्रेतैः गृहीताः इव, मन्त्रशक्तिभिः वशीभूताः इव, वन्यपशुभिः आक्रान्ताः इव, पिशाचग्रस्ताः इव च दृश्यन्ते। ते वदनानि वक्रीकुर्वन्ति कामदेवस्य कुसुमशरैः प्रतिहताः इव, आचरन्ति धनस्य अहङ्काररूपाग्निना पच्यमाना इव, कर्कटवत् कौटिल्यं व्यवहरन्ति। पापेन कर्तव्यमार्गम् अनुसर्तुं शक्तिः राज्ञां विनष्टा भवति। तस्मात् ते राजानः खञ्जवत् अन्यैः परिचाल्यन्ते। मृषाकथनरूपस्य अभ्यासस्य विषेण विकृतमुखाः ते कष्टेन कथयन्ति। सप्तच्छदपुष्पाणां रजःस्पर्शेन यथा शिरोवेदना समुत्पद्यते तथैव तेषां रजोगुणसम्भूतं रक्तनयनयुगलं प्रजानां दुःखं समुत्पादयति। ते भूपाः मुमूर्षवः इव बान्धवान् न परिचिन्वन्ति, अक्षिरोगैः आक्रान्ताः इव ते प्रतापवतः जनान् न पश्यन्ति, कालसर्पेण दष्टाः यथा विषवैद्यस्य उत्कृष्टैः महामन्त्रैः अपि चैतन्यं न प्राप्नुवन्ति, तथैव ते राजानः उत्कृष्टमन्त्रणाभिः अपि स्वविधेयम् न अनुजानन्ति, लाक्षानिर्मिताभूषणानि इव अन्यप्रतापं न सहन्ते, स्तम्भबद्धगजाः इव हितोक्तिम् अपि न आकर्णयन्ति।

धनलिप्सारूपविषेण मूर्च्छिताः ते सर्वम् एव धनमयम् इति पश्यन्ति। प्रस्तरैः शाणिताः बाणाः यथा धनुर्मुक्ताः सन्तः निर्दिष्टं लक्ष्यं भिनत्ति, तथैव सुरासेवनेन वर्धितोग्रस्वभावाः राजानः अन्येन प्रेरिताः

सन्तः प्रजाः पीडयन्ति। यष्टिनिक्षेपेण फलाहरणवत् दूरस्थितान् सद्वंशजान् अपि नाशयन्ति। अकालविकसितानि मनोहराणि पुष्पाणि यथा सुन्दराणि सन्त्यपि जनानां विनाशं सूचयन्ति। तथैव मनोरमाकृतयस्ते राजानः जनानां विनाशस्य कारणानि भवन्ति। श्मशानस्थस्य अग्नेः भस्मवत् अत्यन्तं भयङ्कराः भवन्ति राज्ञां सम्पत्तयः। नेत्ररोगाक्रान्ताः यथा दूरस्थं वस्तु द्रष्टुं न शक्नुवन्ति तथैव राजानः कृतस्य परिणामं द्रष्टुं न पारयन्ति। राजभवनं तावत् कामुकानां वारवनितागृहम् इव नीचस्वभावानां सदनम्। मृतव्यक्तेः दाहकालीनस्य ढक्कानादस्य इव राजगणस्य नामानि श्रुत्वापि उद्वेगः जन्यते। ब्रह्महत्यादिरूपाणां पापानुष्ठानानाम् उद्योगवत् तस्य ध्यानमात्रेणैव मनसि अशान्तिः उत्पद्यते। मन्ये पापेन प्रतिदिनं पूर्यमाणाः राजानः स्फीतशरीराः भवन्ति। तदवस्थायां कामादिदोषैः दुष्टास्ते वल्मीकमृत्तिकया उत्पन्नानां तृणानाम् अग्रपतितजलविन्दुवत् आत्मनां पतनमपि बोद्धुं समर्थाः न भवन्ति।

व्याकरणविमर्शः -

क) समासः -

१. धनलवलाभावलेपविस्मृतजन्मानः - धनस्य लवः धनलवः इति षष्ठीतत्पुरुषः। धनलवस्य लाभः धनलवलाभः इति षष्ठीतत्पुरुषः। धनलवलाभेन अवलेपः धनलवलाभावलेपः इति तृतीयातत्पुरुषः। तेन विस्मृतं धनलवलाभावलेपविस्मृतम् इति तृतीयातत्पुरुषः। धनलवलाभावलेपविस्मृतं जन्म येषां ते धनलवलाभावलेपविस्मृतजन्मानः इति बहुव्रीहिसमासः।

२. उत्कुपितलोचनाः- उत्कुपिते लोचने येषां ते उत्कुपितलोचनाः इति बहुव्रीहिसमासः।

३. मृषावादविषविपाकसञ्जातमुखरोगाः - मृषावाद एव विषम् मृषावादविषम् इति कर्मधारयसमासः। तस्य विपाकः मृषावादविषविपाकः इति षष्ठीतत्पुरुषः। मृषावादविषविपाकेन सञ्जातः मृषावादविषविपाकसञ्जातः इति तृतीयातत्पुरुषः। मृषावादविपाकसञ्जातः मुखरोगः येषां ते मृषावादविषविपाकसञ्जातमुखरोगाः इति बहुव्रीहिसमासः।

४. महामानस्तम्भनिश्चलीकृताः - महत् मानं यस्य स महामानः इति बहुव्रीहिः। महामान एव स्तम्भः महामानस्तम्भः इति कर्मधारयः। महामानस्तम्भेन निश्चलीकृताः महामानस्तम्भनिश्चलीकृताः इति तृतीयातत्पुरुषः।

ख) सन्धिविच्छेदः

१. पञ्चभिरप्यनेकैः - पञ्चभिः अपि अनेकैः।

२. भूतैरिवाभिभूयन्ते - भूतैः इव अभिभूयन्ते।

३. मन्त्रैरिवावेश्यन्ते - मन्त्रैः इव आवेश्यन्ते।

४. सहस्रसंख्यैरिवेन्द्रियैरायास्यमानाः - सहस्रसंख्यैः इव इन्द्रियैः आयास्यमानाः।

अलङ्कारविमर्शः

१. धनलाभेत्यस्माद् बाध्यमानाः इत्यंशभूते वाक्ये दूषितरक्तेन उपमानेन सह रागावेशस्य अवैधर्म्यस्य साम्यस्य कथनाद् उपमालङ्कारः। अत्र उपमानम् , उपमेयम्, साधारणधर्मः सादृश्यवाचकः इत्यंशचतुष्कस्य सत्त्वात् पूर्णोपमा। तल्लक्षणं दर्पणे -

"सा पूर्णा सामान्यधर्म औपम्यवाचि च।

उपमेयं चोपमानं भवेद्वाच्यम्" इति।

२. विविधेतीत्यारभ्य आयास्यमानाः इत्यन्ते वाक्ये गुणस्य सम्भावनाद् गुणोत्प्रेक्षालङ्कारः।

३. एवमेव प्रकृतीतीत्यस्मिन् वाक्ये, मन्त्रैरित्यस्मिन् वाक्ये, मदनशरैरित्यस्मिन् वाक्ये च उत्प्रेक्षालङ्कारः।

४. कुलीराः इत्यस्मिन् वाक्ये, अधर्मभग्नगतयः इत्यस्मिन् वाक्ये च उपमानोपमेययोः अवैधर्म्यस्य साम्यस्य कथनाद् अंशचतुष्कस्य सत्त्वाच्च पूर्णोपमालङ्कारः।

५. मृषावादविषविपाकसञ्जातमुखरोगाः इत्यत्र मृषावाद एव विषमिति निरङ्गं रूपकम्।

६. उत्कुपितलोचनाः इत्यस्मिन् वाक्ये उपमाऽलङ्कारः।

७. कालदष्टाः इत्यस्मिन् वाक्ये उपमाकाव्यलिङ्गयोस्तिलतण्डुलन्यायेन संसृष्टिरलङ्कारः।

८. तृष्णाविषमूर्च्छिताः इत्यस्मिन् वाक्ये रूपकोत्प्रेक्षयोरङ्गाङ्गिभावेन संकरः।

९. इषव इत्यस्मिन् वाक्ये, दूरस्थितानीत्यस्मिन् वाक्ये, अकालेतीत्यस्मिन् वाक्ये, श्मशानाग्नयः इत्यस्मिन् वाक्ये उपमाऽलङ्कारः, तैमिरिका इत्यस्मिन् वाक्ये, उपसृष्टा इत्यम्मिन् वाक्ये, श्रूयमाणा इत्यस्मिन वाक्ये, चिन्त्यमाना इत्यस्मिन् वाक्ये अनुदिवसमित्यस्मिन् च उपमाऽलङ्कारः।

कोशः

१. "कुसुमं स्त्रीरजोनेत्ररोगयोः फलपुष्पयोः" इति मेदिन्युक्तेः कुसुमशब्दस्य स्त्रीरजः, नेत्ररोगः, फलम्, पुष्पम् इत्येतेषु अर्थेषु व्यवहारो भवति।

२. "भूतिर्भस्मनि सम्पत्तिहस्तिशृङ्गारयोः स्त्रियाम्" इति मेदिनीकोशाद् भूतिशब्दस्य सम्पत्तिः हस्तिशृङ्गारम् इत्यनयोः अर्थयोः प्रयोगः।

पाठगतप्रश्नाः- २

७. क्षणस्थायिन्या सम्पदा लुब्धाः राजानः केषां निन्दाभाजनानि भवन्ति?

८. राज्ञां तेषाम् इन्द्रियाणाम् आधिक्यस्य कारणं किम्?

९. मनः कथं विविधेषु विषयेषु प्रधावति?

१०. मदनशरैः प्रतिहताः ते राजानः किं कुर्वन्ति?

११. राजानः किमिव वक्रगत्या व्रजन्ति?

१२. मुमूर्षूवत् ते राजानः किं परिचेतुम् असमर्थाः भवन्ति?

१३. राजसम्पत्तिः कीदृशी भवति?

१४. ते राजानः किमिव प्रजानां शिरोवेदनां जनयन्ति?

१८.३) साम्प्रतं मूलपाठम् अवगच्छाम – १२

अपरे तु स्वार्थनिष्पादनपरैर्धन–पिशित–ग्रास–गृध्रैरास्थाननलिनीबकैः, द्युतं विनोद इति, परादाराभिगमनं वैदग्ध्यमिति, मृगया श्रम इति, पानं विलास इति, प्रमत्तता शौर्य्यमिति, स्वदारपरित्यागोऽव्यसनितेति, गुरुवचनावधीरणम् अपरप्रणेयत्वमिति, अजितभृत्यता सुखोपसेव्यत्वमिति, नृत्य–गीत–वाद्य–वेश्याभिसक्ती रसिकतेति, महापराधाकर्णनं महानुभावतेति, पराभवसहत्वं क्षमेति, स्वच्छन्दता प्रभुत्वमिति, देवावमाननं महासत्त्वतेति, वन्दितजनख्यातिर्यश इति, तरलता उत्साह इति, अविशेषज्ञता अपक्षपातित्वमिति दोषानपि गुणपक्षमध्यारोपयद्भिरन्तः स्वयमपि विहसद्भिः प्रतारणकुशलैर्धूर्त्तैरमानुषोचिताभिः स्तुतिभिः प्रतार्य्यमाणा वित्तमदमत्तचित्ता निश्चेतनतया तथैवेत्यन्यारोपितालीकाभिमाना मर्त्यधर्म्माणोऽपि दिव्यांशावतीर्णमिव सदैवतमिवातिमानुषमात्मानमुत्प्रेक्षमाणाः प्रारब्धदिव्योचितचेष्टानुभावाः सर्वजनस्य उपहास्यतामुपयान्ति।

व्याख्यानम् -

अपरे तु दोषान् अपि गुणपक्षम् अध्यारोपयद्भिः धूर्तैः अमानुषोचिताभिः स्तुतिभिः प्रतार्यमाणाः सर्वजनस्योपहास्यताम् उपयान्तीति मूलवाक्यस्यान्वयः। अत्र धूर्तैः इत्यस्य स्वार्थनिष्पादनपरैः, धनपिशितग्रासगृध्रैः, आस्थाननलिनीबकैः, दोषान् अपि गुणपक्षमध्यारोपयद्भिः, अन्तः स्वयमपि विहसद्भिः, प्रतारणकुशलैः इत्येतानि षड् विशेषणानि सन्ति। एवं वाक्यस्य धूर्तविशेषणसंयोगेन आकारो भवति - अपरे तु स्वार्थनिष्पादनपरैः, धनपिशितग्रासगृध्रैः, आस्थाननलिनीबकैः, गुणपक्षमध्यारोपयद्भिः, अन्तः स्वयमपि विहसद्भिः, प्रतारणकुशलैः, धूर्तैः अमानुषोचिताभिः स्तुतिभिः प्रतार्यमाणाः सर्वजनस्योपहास्यताम् उपयान्ति इति।

अपरे इत्यस्य प्रतार्यमाणाः, वित्तमदमत्तचित्ताः, निश्चेतनतया तथैव इत्यन्यारोपितालीकाभिमानाः मर्त्यधर्माणः, दिव्यांशावतीर्णमिव सदैवतमिवातिमानुषम् आत्मानमुत्प्रेक्षमाणाः, प्रारब्धदिव्योचितचेष्टानुभावाः इत्येतानि पञ्च विशेषणानि। एवं धूर्तैः इत्यस्य अपरे इत्यस्य विशेषणानां संयोजनेन जातस्य वाक्यस्यान्वयार्थः तावत् - अपरे तु अन्ये राजानः तु स्वार्थनिष्पादनपरैः स्वार्थस्य निजप्रयोजनस्य यत् निष्पादनम् साधनं वञ्चनादिकं तत्परैः स्वार्थनिष्पादकवञ्चनादिपरैः, धनपिशितग्रासगृध्रैः धनं द्रव्यं तदेव पिशितं मांसं तस्य ग्रासे भक्षणे गृध्रैः दूरदृष्टिभिः विहगविशेषैः इव, आस्थाननलिनीबकैः आस्थानं राजसभामण्डपः, एव नलिनी कमलिनी

तस्यां बकैः कङ्कैः, यथा बका नलिनीमवलम्ब्य तिरोहिता भूत्वा मीनान् भक्षयन्ति तथैव बकव्रतिका धूर्ता अपि राजानमाश्रित्य लोकान्प्रतार्य तदीयं धनमात्मसात्कुर्वन्तीति भावः। दोषान् अपि अपराधान् अपि गुणपक्षम् गुणत्वेन आरोपयद्भिः प्रशंसद्भिः, अन्तः अन्तःकरणेषु स्वयमपि आत्मना अपि विहसद्भिः हासं कुर्वद्भिः, प्रतारणकुशलैः वञ्चननिपुणैः, धूर्तैः प्रतारकैः अमानुषोचिताभिः देवयोग्याभिः स्तुतिभिः प्रशंसावाग्भिः प्रतार्यमाणाः वञ्च्यमानाः वित्तमदमत्तचित्ताः वित्तमदेन धनगर्वेण मत्तम् उन्मत्तं चित्तं मानसं येषां ते धनगर्वोन्मत्तमानसाः, निश्चेतनतया बुद्धिजाड्यात् तथैव 'एते यथा वदन्ति तथा एव अहम् अस्मि' इति एवम्प्रकारेण अन्यारोपितालीकाभिमानाः अन्येन आरोपितः अध्यस्तः अलीकाभिमानः असत्यमदः येषां ते अन्याध्यस्तासत्यमदाः, मर्त्यधर्माणः मरणशीलाः सन्तः अपि दिव्यांशावतीर्णम् इव अलौकिकदेवांशसम्भूतम् इव सदैवतम् इव देवताश्रितम् इव अतिमानुषम् मानवमतिक्रम्य वर्तमानम् आत्मानं स्वम् उत्प्रेक्षमाणाः सम्भावयन्तः, प्रारब्धदिव्योचितचेष्टानुभावाः प्रारब्धाः समारब्धाः दिव्योचिताः देवयोग्याः चेष्टानुभावाः शापमात्रेण अरिप्रणाशादिप्रभावाः यैस्ते सर्वजनस्य सकललोकस्य उपहास्यताम् उपहासविषयताम् उपयान्ति प्राप्नुवन्ति।

इति दोषानपि गुणपक्षमध्यारोपयद्भिः इत्यत्र दोषाणां वर्णनमस्ति। अत्र षोडश दोषाः वर्णिताः। दोषप्रतिपादकांशस्य व्याख्यानं तावद् - द्यूतं दुरोदरम् अक्षक्रीडा विनोद क्रीडासाधनम् इति, परादाराभिगमनं परदाराणाम् अन्यभार्याणाम् अभिगमनं सङ्गमः वैदग्ध्यं रसिकत्वम् इति, मृगया आखेटः श्रमः व्यायामः इति, पानं सुरापानं विलास विलमनम् इति, प्रमत्तता उन्मादना शौर्य्यं शूरस्वभावः इति, स्वदारपरित्यागः निजपत्नीत्यागः अव्यसनिता व्यसनाभावः इति, गुरुवचनावधीरणम् गुरवचनस्य आचार्यवचस अवधीरणं स्वीकारः परप्रणेयत्वं अन्यप्रभावितत्वम् इति, अजितभृत्यता अस्वायत्तीकृतसेवकता सुखोपसेव्यत्वं सुखेन अनायासेन उपसेव्यत्वम् उपसेवनीयत्वम् इति। अर्थाद् मदीयाः सेवका न मदधीनाः, अतः तैः अहम् सुखेन उपसेवनीयः, मदीया ख्यातिर्भविष्यति इति तात्पर्यम्। नृत्य-गीत-वाद्य-वेश्याभिसक्तिः नृत्यं नाट्यम् गीतं गानं वाद्यं वादित्रं वेश्या गणिका तासु अभिसक्तिः आसक्तिः रसिकता रसाभिज्ञता इति, महापराधाकर्णनं महताम् अपराधानां नरवधादीनां श्रवणं महानुभावता महाप्रभावत्वम् इति, पराभवसहत्वं पराभवस्य पराजयस्य सहत्वं सहनशीलत्वं क्षमा क्षान्तिः इति, स्वच्छन्दता स्वेच्छावर्तनं प्रभुत्वम् ऐश्वर्यम् इति, देवावमाननं देवानां नारायणादीनाम् अवमाननम् अपमानं महासत्त्वता महाशक्तिशालित्वम् इति, वन्दितजनख्यातिः वन्दितजनाः स्तुतिपाठकजनाः तैः कृता ख्यातिः स्वप्रसिद्धिः यश इति, तरलता चञ्चलता उत्साहः अध्यवसाय इति, अविशेषज्ञता विशेषस्यानभिज्ञता अपक्षपातित्वं पक्षपातराहित्यम् समवर्तित्वम् इति। एवं दोषान् गुणपक्षमध्यारोपयद्भिः धूर्तैः अन्ये राजानः वञ्च्यमानाः भवन्ति।

द्यूतस्य विनोदत्वस्वीकारो दोषाय एव भवति। विनोदपक्षे शाकुन्तलभणितिः लभ्यते - "मिथ्यैव व्यसनं वदन्ति मृगयामीदृग् विनोदः कुतः"इति। सर्वेण प्रयत्नेन राजा व्यसनेषु अनासक्तो भवेदिति कथयति मनुस्मृतिः। द्यूतक्रीडा, परस्त्रीगमनम्, मृगया सुरापानञ्च कामजेषु व्यसनेषु चत्वारि भवन्ति। तथाह्युक्तं मनुसंहितायां सप्तमाध्याये राजधर्मप्रकरणे -

"मृगयाक्षो दिवास्वप्नो परिवादः स्त्रियो मदः।

तौर्यत्रिकं वृथाट्या च कामजो दशको गणः।।"इति। कामजेषु व्यसनेषु च एतच्चतुष्टयं कष्टतमम्। तथाह्युक्तम् -

"पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमम्।

एतत्कष्टतमं विद्याच्चतुष्के कामजे गणे।।"इति।

परदारैः सह सङ्गमो न कार्यः इति स्मृतयः। अतः स्वदारान् परित्यज्य परदाराभिसक्तिः राज्ञः दुश्चरितमेव प्रकटयति। अजितभृत्यता हि उपसेव्यत्वम् इति राज्ञः क्लीबत्वमेव प्रतिपादयति। नृत्यगीतवेश्याभसक्तिः राज्ञः नैव उचिता। यतो हि इदं कामजव्यसनं भवति। महापराधानां सामान्यबुद्ध्या उपेक्षणं राज्ञः दोषाय भवति। यतो हि राजा यदि एवं करोति तदा मात्स्यन्यायः प्रवर्तते। तदा दुर्बलान् बलवत्तराः ग्रसन्ते। एवम् अविचारमूलकम् इदं राज्ञ आचरणं भवति।

स्वेच्छाचरणं न हि राज्ञ ऐश्वर्यम्। "यद् यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः" इति गीतोक्तेः राज्ञः स्वेच्छाचरणं प्रजानाम् अनियन्त्रिताचरणस्य कारणं स्यात्। अतः राजा कदापि स्वेच्छाचारी न भवेत्। स हि शास्त्रानुसारेण एव राजधर्मं परिपालयेत्।

देवावमाननं राज्ञः नास्तिक्यस्य परिचायकम्। न हि तद् महासत्त्वतां प्रतिपादयति। तद् हि निन्दनीयमेव। महासत्त्वता इत्यत्र व्यवहृतः सत्त्वशब्दः गुणपरकः - "सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः" इति मेदिनीकोशात्। महाशक्तिशालित्वं इत्यत्र शक्तिशालित्वं तु गुणपरकमेव।

अविशेषज्ञता कदापि अपक्षपतित्वं न भवति। तद् हि विवेकराहित्यमेव।

सरलार्थः -

एवं नैके राजानः सन्ति, येषां सभायां स्वार्थसम्पादने रताः, धनरूपिमांसग्रहणे गृध्रसदृशाः, सभामण्डपरूपपद्मवने स्थिताः बकपक्षिस्वरूपाः, प्रवञ्चने कुशलाः केचन धूर्ताः तिष्ठन्ति। ये च राज्ञाम् एवं बोधनं कुर्वन्ति यत् - अक्षक्रीडा भवति विनोदः, परस्त्रीसङ्गमः चातुर्यम्, मृगया व्यायामः, मद्यपानं विलासिता, कस्मिंश्चिदपि विषये असावधानता हि वीरता, तथा स्वस्य धर्मपत्न्याः त्यागः अनासक्तिः, गुरूपदेशस्य अवमानना हि स्वाधीनता, स्वेच्छानुसारं विद्यमानानां सेवकानां कृते दण्डस्य अभावो हि सुखपूर्विका शुश्रूषा, नृत्य-गीत-वाद्यादिषु गणिकासु च आसक्तिः रसिकता, महत्सु अपराधेषु अनवधानं स्वस्य महानुभवतायाः परिचयः, परकृतस्य अपमानस्य सहनं हि क्षमा,स्वेच्छाचारित्वं हि प्रभुत्वम्, देवतानां तिरस्कारः महाबलस्य परिचयः, वन्दिजनैः कृता प्रशंसा यशः, मनसः चञ्चलता हि उत्साहः, सूक्ष्मरूपेण कार्याणाम् अपर्यालोचनं भवति निष्पक्षपातः। एवम्प्रकारेण प्रतारणनिपुणाः धूर्ताः गुणेषु दोषाणाम् अपि आरोपं कुर्वन्ति। किन्तु ते मनसि स्वयमेव उपहासं कुर्वन्तः देवतानां यथायोग्यं स्तुतिभिः राज्ञां प्रतारणां कुर्वन्ति। अन्यपक्षे तु राजानः धनस्य अहङ्कारवशात् उन्मत्ताः सन्तः जनानाम् एवंभूतैः स्तुतिभिः चैतन्यविहीनाः भवन्ति, अत एव "एते यथा वदन्ति, अहं तथैव अस्मि" इति चिन्तयन्ति। किञ्च, तत्सर्वं यथार्थं मत्वा मिथ्या अभिमानं कुर्वन्ति। मनुष्याः सन्तोऽपि ते राजानः आत्मानं देवानाम् अंशतः अवतीर्णान् अथवा देवताभिः अधिष्ठितान् मन्यन्ते। किञ्च स्वकार्यं ते राजानः देवानुग्रहं मन्यन्ते।

एवं ते राजानः समस्तलोकस्य उपहासयोग्यत्वं व्रजन्ति। एवं राजा मा भूत् चन्द्रापीड इति शुकनासस्याशयः।

व्याकरणविमर्शः -

क) समासः -

१. आस्थाननलिनीबकैः- आस्थानम् एव नलिनी आस्थाननलिनी इति कर्मधारयसमासः। आस्थाननलिन्यां बकः आस्थाननलिनीबकः, तैः इति सप्तमीतत्पुरुषसमासः।

२. प्रारब्धदिव्योचितचेष्टानुभावाः- दिव्योचिताः चेष्टानिभावाः दिव्योचितचेष्टानुभवाः इति कर्मधारयसमासः। प्रारब्धाः दिव्योचितचेष्टानुभवा यैः ते प्रारब्धदिव्योचितचेष्टानुभावाः इति बहुव्रीहिसमासः।

ख) सन्धिविच्छेदः

१. प्रतारणकुशलैर्धूर्त्तैरमानुषोपचिताभिः - प्रतारणकुशलैः धूर्तैः अमानुषोपचिताभिः।

२. देवाधिष्ठितोऽहम् - देवाधिष्ठितः अहम्।

अलङ्कारविमर्शः

१. अपर इत्यस्मिन् वाक्ये परम्परितरूपकमलङ्कारः।

२. इतीत्यस्मिन् वाक्ये उत्प्रेक्षालङ्कारः।

३. सदैवतमित्यस्मिन् वाक्येऽपि उत्प्रेक्षालङ्कारः।

कोशः

१. "सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः" इति मेदिनी।

पाठगतप्रश्नाः- ३

१५. राजसभायां स्थिताः स्वार्थनिष्पादनपराः धूर्ताः कीदृशाः भवन्ति?

१६. धूर्ताणां तेषां मते अक्षक्रीडा नाम का?

१७. राजसभास्थानां धूर्ताणां नये प्रभुत्वं किम्?

१८. कीदृशाः जनाः निश्चेतनाः भवन्ति?

१९. ते राजानः कस्मात् कारणात् हास्यास्पदानि भवन्ति?

पाठसारः

यौवनम्, धनसम्पत्तिः, प्रभुत्वम्, अविवेकिता – एतेषु एकैकमपि महत् अनर्थं जनयति। यत्र तु एतत् चतुष्टयं वर्तते तत्र किमपि वक्तव्यमेव नास्ति। एषा दुराचारिणी लक्ष्मीः यं राजानम् आश्रयति सः अज्ञानेनैव दुराचारपरायणो भवति। अस्मिन् पाठे महाकविना बाणेन शुकनासमुखेन चन्द्रापीडोपदेशव्याजेन तस्याः लक्ष्म्याः कुप्रभावः सकारणं वर्णितः। तथाहि सा लक्ष्मीरेव राज्याभिषेकसमये एव मङ्गलकलशजलैः राज्ञां दुर्गुणापसारणम् अकृत्वा उदारतां प्रक्षालयन्ति, होमाग्निना चित्तं मलिनीकरोति, पुरोहितस्य कुशाग्रभागरूपसम्मार्जन्या दयादाक्षिण्यक्षमासन्तोषादिगुणान् दूरीकरोति, मुकुटस्य पट्टबन्धनेन राज्ञां वार्धक्यगतेः स्मृतिम् आच्छादयति, छत्रमण्डलेन तेषां परलोकज्ञानम् अपसारयति, चामरैः सत्यकथनं निवर्तयति, वेत्रदण्डैः धैर्यशौर्यादीन् सद्गुणान् दूरं संस्थापयति,जयशब्दादिकलरवैः हितवचनानि न श्रावयति। यानि यशांसि नामानि राजस्तुतयः वर्तन्ते यथा राज्ञा इदं कार्यम्, इत्थं स्थेयम् इत्थमाचरणीयमित्यादीनि उत्तमराजचरितवर्णनरूपाः स्तुतयः यथा पत्रैः मलम् अपसार्यते तथैव राज्ञां ध्वजायाः वस्त्ररूपपत्रैः तानि सर्वाणि अपसारयति इयं लक्ष्मीः।

परिश्रमेण क्लान्तस्य पक्षिणः शिथिलीभूतः गलदेशः यथा क्षणस्य कृते चञ्चलताम् उपैति, खद्योतस्य प्रकाशः यथा क्षणाय सुन्दरः भवति तथैव सुन्दरदर्शना इयं सम्पद्। अस्याः सम्पदः चञ्चलत्वे अपि ज्ञानिभिः निन्दितया एतया सम्पदा प्रलुब्धाः सन्तः केचन राजानः तु ज्ञानिनां निन्दाभाजनानि एव भवन्ति। एते किञ्चिद्धनलाभस्य अहङ्कारेण स्वस्वजन्मवृतान्तं विस्मरन्ति। अपि च वात-पित्त-कफैः दूषितं रुधिरमिव बहुविधैः दोषैः वर्धितां विषयासक्तियन्त्रणां भुञ्जन्ते। शब्दस्पर्शादिविषयाणां ग्रहणे लोलुपैः विषयाणां बाहुल्यात् पञ्चाधिकसहस्रसंख्यकैः इन्द्रियैः कष्टम् अनुभवन्ति। प्रकृत्या एव मनः विविधेषु विषयेषु प्रधावति। तस्मादेव एकमपि मनः सहस्रत्वेन प्रतीयते। तेनैव मनसा राजानः चञ्चलताम् उपयन्ति। तेन ते च राजानः पुनः दुष्टग्रहैः गृहीता इव, प्रेतैः गृहीताः इव, मन्त्रशक्तिभिः वशीभूताः इव, वन्यपशुभिः आक्रान्ताः इव, पिशाचग्रस्ताः इव च दृश्यन्ते। ते वदनानि तथा वक्रीकुर्वन्ति यथा कामदेवस्य कुसुमशरैः प्रतिहताः प्राणिनः प्रकटयन्ति, धनस्य अहङ्काररूपाग्निना दग्धाः यथा आचरन्ति तथैव ते आचरन्ति, कर्कटवत् कौटिल्यं व्यवहरन्ति। पापेन कर्तव्याणां पथिषु चलितुं राज्ञां तेषां शक्तिः विनष्टा भवति। तस्मात् कारणात् ते राजानः खञ्जवत् अन्यैः परिचाल्यन्ते। मृषाकथनस्य अभ्यासवशात् ते कष्टेनैव सर्वं तथा कथयन्ति यथा विषेण विकृतमुखाः कथयन्ति। सप्तच्छदपुष्पाणां रजःस्पर्शेन यथा शिरोवेदना समुत्पद्यते तथैव तेषां लक्ष्मीमदेन रजोगुणसम्भूतं रक्तनयनयुगलं प्रजानां दुःखं समुत्पादयति। ते भूपाः मुमूर्षवः इव बान्धवान् न परिचिन्वन्ति, अक्षिरोगैः आक्रान्ताः इव ते प्रताववतः जनान् अपि न पश्यन्ति, कालसर्पेण दष्टाः यथा विषवैद्यस्य उत्कृष्टैः महामन्त्रैः अपि चैतन्यं न प्राप्नुवन्ति, तथैव ते राजानः उत्कृष्टमन्त्रणाभिः अपि स्वविधेयम् न अनुजानन्ति। लाक्षानिर्मितं भूषणं यथा अग्निः न सहते तथैव ते राजानः अन्यप्रतापं न सहन्ते। स्तम्भबद्धगजाः इव हितोक्तिम् अपि न आकर्णयन्ति। धनलोभरूपविषेण मूर्च्छिताः ते सर्वम् एव धनमयम् इति पश्यन्ति। प्रस्तरैः शाणिताः बाणाः यथा धनुर्मुक्ताः निर्दिष्टलक्ष्यभेदकाः तथैव ते सुरासेवकाः वर्धितदर्पाः राजानः खलप्रेरिताः प्रजापीडकाः। ते हि दूरस्थानां सद्वंशानामपि यष्टिनिक्षेपेण

फलानाम् आहरणवत् नाशकाः। अकालविकसितानि मनोहराणि पुष्पाणि रम्याणि अपि जनसन्तापकानि एवमेव राजानाः रम्याः विनाशकारकाः। श्मशानस्थस्याग्नेः भस्मवत् अत्यन्तं भयङ्करं राजश्रीः। नेत्ररोगाक्रान्ताः इव ते दृश्यस्यापि अदर्शकाः। तषां राज्ञां भवनं कामुकानां वारवनितागृहवत् नीचस्वभावानाम् आश्रयः। ते राजानः पापपूर्णाः प्रत्यहं स्फीतकायाः भवन्ति। तदवस्थायां कामादिदोषैः दुष्टास्ते वल्मीकमृत्तिकया उत्पन्नानां तृणानाम् अग्रपतितजलविन्दुवत् आत्मनां पतनमपि बोद्धुं समर्थाः न भवन्ति।

एवं नैके राजानः सन्ति, येषां सभामण्डपरूपपद्मवने स्थिताः स्वार्थसम्पादने रताः गृध्रसदृशाः, प्रवञ्चने कुशलाः केचन धूर्ताः तिष्ठन्ति। ते दोषान् अपि गुणत्वेन भावयन्ति। यथा - अक्षक्रीडा भवति विनोदः, परस्त्रीयाः अभिगमनं चातुर्यम्, मृगयणं व्यायामः, मद्यपानं विलासिता, असावधानता हि वीरता, स्वस्य धर्मपत्न्याः त्यागः अनासक्तिः इत्यादिप्रकारेण ते प्रतारणनिपुणाः धूर्ताः बोधयित्वा राजानं वञ्चयन्ति। ते राजानः धनोन्मत्ताः सन्तः जनस्तुतिभिः विवेकहीनाः भवन्ति। ते आत्मानं देवांशं मन्यन्ते। एवं ते समेषां उपहासास्पदानि भवन्ति।

पाठान्तप्रश्नाः

१. दुराचारिण्या लक्ष्म्या वशीभूतानां राज्ञां दशा कीदृशी भवतीति वर्णयत।

२. अभिषेककाले राज्ञां सुगुणाः कैः कथञ्च अपनीयन्ते।

३. राजानः इन्द्रियैः केन प्रकारेण कष्टभोगं कुर्वन्ति।

४. राजानः आत्मकर्तव्यं यथा आत्मपतनं बोद्धुम् असमर्था भवन्ति तत्र सोदाहरणं कारणानि प्रदर्शयत।

५. राज्ञां सभायां कीदृशा धूर्ताः तिष्ठन्तीति वर्णयत।

६. स्वार्थनिष्पादनपराः धूर्ताः केन प्रकारेण दोषेषु गुणानाम् आरोपं कुर्वन्ति।

७. अहङ्कारेण उन्मत्ताः राजानः केन प्रकारेण जनानां हास्यास्पदानि भवन्ति।

पाठगतप्रश्नोत्तराणि

१. दुराचारया लक्ष्म्या परिगृहीताः राजानः विक्लवा दुर्मतयश्च भवन्ति।

२. अभिषेककाले मङ्गलकलशजलैः राज्ञां दाक्षिण्यं प्रक्षाल्यते इव ।

३. दुष्टानां राज्ञां हृदयं होमाग्निधूमेन मलिनीभवति।

४. राज्ञां क्षमागुणः पुरोहितानां कुशाग्रसम्मार्जनीभिः अपसार्यते।

५. अभिषेकसमये राज्ञां वार्धक्यबुद्धिः मुकुटस्य बन्धनेन दूरीभवति।

६. राज्ञां यशः अभिषेककाले ध्वजपत्रसंलग्नैः पल्लवैः परिमार्ज्यते।

७. क्षणस्थायिन्या सम्पदा लुब्धाः राजानः मनस्विजनानां निन्दाभाजनानि।

८. राज्ञां तेषाम् इन्द्रियाणाम् आधिक्ये कारणं विविधविषयाणां ग्रासस्य लालसा।

९. मनः स्वभावतः चञ्चलम् अतः विविधेषु विषयेषु प्रधावति।

१०. मदनशरैः प्रतिहताः ते राजानः मुखभङ्गसहस्राणि कुर्वन्ति।

११. राजानः कर्कटवद् वक्रगत्या व्रजन्ति।

१२. मुमूर्षुवत् ते राजानः बान्धवान् परिचेतुम् असमर्थाः भवन्ति।

१३. राजसम्पत्तिः श्मशाग्निजन्यं भस्मवद् भयङ्करं भवति।

१४. ते राजानः सप्तच्छदतरव इव प्रजानां शिरोवेदनां जनयन्ति।

१५. राजसभायां स्थिताः स्वार्थनिष्पादनपराः धूर्ताः प्रतारणकुशलाः दोषेषु गुणान् आरोपयन्तः स्वयमपि विहसन्तः भवन्ति।

१६. धूर्ताणां तेषां मते अक्षक्रीडा नाम विनोदः।

१७. राजसभास्थानां धूर्ताणां नये प्रभुत्वं स्वेच्छाचारित्वम्।

१८. वित्तमदमत्तचित्ताः जनाः निश्चेतनाः भवन्ति।

१९. ते राजानः दिव्योचितचेष्टादर्शनात् हास्यास्पदानि भवन्ति।

॥ इति अष्टादशः पाठः ॥